0649CH13

त्रयोदशः पाठः

# विमानयानं रचयाम



राघव! माधव! सीते! ललिते!
विमानयानं रचयाम ।
नीले गगने विपुले विमले
वायुविहारं करवाम ॥1॥

उन्नतवृक्षं तुङ्गं भवनं
क्रान्त्वाकाशं खलु याम ।
कृत्वा हिमवन्तं सोपानं
चन्दिरलोकं प्रविशाम ॥2॥

शुक्रश्चन्द्रः सूर्यो गुरुरिति
ग्रहान् हि सर्वान् गणयाम ।
विविधाः सुन्दरताराश्चित्वा
मौक्तिकहारं रचयाम ॥3॥

अम्बुदमालाम् अम्बरभूषाम्
आदायैव हि प्रतियाम ।
दुःखित-पीडित-कृषिकजनानां
गृहेषु हर्षं जनयाम ॥4॥

– डॉ. विश्वासः

not to be republished








## शब्दार्थाः

| | | | |
|---|---|---|---|
| विमानयानम् | - | हवाई जहाज | aeroplane |
| रचयाम | - | (हम) बनाएँ | should make |
| विपुले | - | विस्तृत (आकाश) में | expansive |
| विमले | - | निर्मल (आकाश) में | clear |
| वायुविहारम् | - | वायुयात्रा (आकाश में यात्रा) | flying in the sky |
| करवाम | - | (हम) करें | should do |
| उन्नतवृक्षम् | - | ऊँचे वृक्ष को | high tree |
| तुङ्गम् | - | ऊँचा | high |
| क्रान्त्वा | - | पार करके | crossing over |
| याम | - | (हम) चलें | should go |
| हिमवन्तं सोपानम् | - | बर्फ की सीढ़ी को | ice-ladder |
| चन्दिरलोकम् | - | चन्द्रलोक को | moonland |
| प्रविशाम | - | (हम) प्रवेश करें | should enter |
| गणयाम | - | (हम) गिनें | should count |
| चित्वा | - | चुनकर | picking up |
| मौक्तिकहारम् | - | मोतियों के हार को | pearl neckless |
| अम्बुदमालाम् | - | बादलों की माला को | cloud-garland |
| अम्बरभूषाम् | - | आकाश की शोभा को | beauty of sky |
| प्रतियाम | - | (हम) लौटें | should return |
| जनयाम | - | (हम) उत्पन्न करें | should create |
| आदाय | - | लेकर | taking |

© NCERT not to be republished





## अभ्यासः

1. **पाठे दत्तं गीतं सस्वरं गायत।**

2. **कोष्ठकान्तर्गतेषु शब्देषु तृतीया-विभक्तिं योजयित्वा रिक्तस्थानानि पूरयत-**

यथा- नभः <u>चन्द्रेण</u> शोभते। (चन्द्र)

(क) सा .................... जलेन मुखं प्रक्षालयति। (विमल)

(ख) राघवः .................... विहरति। (विमानयान)

(ग) कण्ठः .................... शोभते। (मौक्तिकहार)

(घ) नभः .................... प्रकाशते। (सूर्य)

(ङ) पर्वतशिखरम् .................... आकर्षकं दृश्यते। (अम्बुदमाला)

3. **भिन्नवर्गस्य पदं चिनुत-**

| | भिन्नवर्गः |
|---|---|
| यथा- सूर्यः, चन्द्रः, अम्बुदः, शुक्रः। | अम्बुदः |
| (क) पत्राणि, पुष्पाणि, फलानि, मित्राणि। | .................... |
| (ख) जलचरः, खेचरः, भूचरः, निशाचरः। | .................... |
| (ग) गावः, सिंहाः, कच्छपाः, गजाः। | .................... |
| (घ) मयूराः, चटकाः, शुकाः, मण्डूकाः। | .................... |
| (ङ) पुस्तकालयः, श्यामपट्टः, प्राचार्यः, सौचिकः। | .................... |
| (च) लेखनी, पुस्तिका, अध्यापिका, अजा। | .................... |

4. **प्रश्नानाम् उत्तराणि लिखत-**


(क) के वायुयानं रचयन्ति?

(ख) वायुयानं कं-कं क्रान्त्वा उपरि गच्छति?

(ग) वयं कीदृशं सोपानं रचयाम?

(घ) वयं कस्मिन् लोके प्रविशाम?

© NCERT not to be republished





(ङ) आकाशे का: चित्वा मौक्तिकहारं रचयाम?

(च) केषां गृहेषु हर्ष जनयाम?

## 5. विलोमपदानि योजयत-

| | |
|---|---|
| उन्नत: | पृथिव्याम् |
| गगने | असुन्दर: |
| सुन्दर: | अवनत: |
| चित्वा | शोक: |
| दु:खी | विकीर्य |
| हर्ष: | सुखी |

## 6. समुचितै: पदै: रिक्तस्थनानि पूरयत-

| विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भानु: | भानू | ............ |
| द्वितीया | ............ | ............ | गुरून् |
| तृतीया | ............ | पशुभ्याम् | ............ |
| चतुर्थी | साधवे | ............ | ............ |
| पञ्चमी | वटो: | ............ | ............ |
| षष्ठी | गुरो: | ............ | ............ |
| सप्तमी | शिशौ | ............ | ............ |
| सम्बोधन | हे विष्णो! | ............ | ............ |

## 7. पर्याय-पदानि योजयत-

| | |
|---|---|
| गगने | जलद: |
| विमले | निशाकर: |
| चन्द्र: | आकाशे |
| सूर्य: | निर्मले |
| अम्बुद: | दिवाकर: |

© NCERT not to be republished

